National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(55): 250-251
© 2024 NJHSR
www.sanskritarticle.com

**वादिराजः के.**
शोधछात्रः, द्वैतवेदान्त विभागः ,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**वादिराजः के.**
शोधछात्रः, द्वैतवेदान्त विभागः ,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# श्वेतवराहकल्पे सृष्टिः

**वादिराजः के.**

चतुर्मुखब्रह्मणो द्वितीयपरार्धे प्रथमकल्पः श्वेतवराहकल्पः। महापुराणे भागवते तृतीयस्कन्धे, तत्रैव विजयध्यजीये व्याख्याने च अयं विषयः स्पष्टः। तथा हि –

**“अयं तु कथितः कल्पो द्वितीयस्यापि भारत ।**

**वराह इति विख्यातो यत्राऽसीत् सूकरो हरिः ॥**

(३.१२.३६)

“द्वितीयपरार्धस्य वराह इति विख्यातः प्रथमः कल्पः। तत्रैव महाविष्णुः श्वेतवराहरूपेणास्मिन् कल्प अवततार । तेनायं श्वेतवराहकल्पः।

पाद्मकल्पस्य चरमे दिने जगत् प्रलीनं भवति भागशः। वह्निवायुवृष्टयः एतत्प्रलयं विदधाति। समग्रा भूमिः प्रलयवार्षु निमग्ना भवति ज्योतिर्मण्डलमपि लीनं भवति। चतुर्मुखब्रह्मणः अंगेषु सर्वाणि तत्वानि विलीनानि भवन्ति । देवताश्च भूर्भुवस्स्वर्लोकाः प्रलीना भवन्ति ।

श्वेतवराहस्य प्रथमदिने चतुर्मुखब्रह्मणः पुनः सिसृक्षा जायते । स च तदा हृदयगुहास्थितं पद्मनाभं भक्त्या स्तौति । पद्मनाभश्च चतुर्मुखदृष्टिगोचरो भवति । तस्मिन्नेव प्रविश्य तद्वारा स्वयमेव सृष्टिं करोति ।

**अवशिष्टोऽष्टमे भागे निशायामुत्थितो विधिः ।**

**सस्मार पद्मनाभं तं हृदिस्थं भक्तिसंयुतः ।**

**तुष्टावालौकिकैः स्तोत्रैः स प्रसन्नो निजं वपुः ।**

**तस्मै सन्दर्शयामास तत्राविश्यासृजत् स्वयम् ॥ -** विष्णुरहस्ये

चतुर्मुखे ब्रह्मणि ससिसृक्षे भूमिश्च जलनिमग्ना आसीत् । कुत्र सृजानीनि चिन्तामग्नश्च ब्रह्म विष्णुं तुष्टाव। विष्णुश्च श्वेतवराहरूपेणाऽविर्बभूव। अस्मिंश्च प्रलयजलमग्नां भूमिमुद्दरति हिरण्याक्षनामा दैत्यः रुरोध । अयंचासुरः चतुर्मुखब्रह्मणो नासाया आविर्भूतः ।

**हिरण्यगर्भस्य नासाश्वासाद् विनिर्ययौ ।**

**हिरण्याक्षौ महारौद्रस्तत्क्षणात् स महानभूत् ॥**

विष्णुरहस्ये

अयमसुरः श्वेतवराहेण दंष्ट्राभिर्हतः। भूमिश्च प्रलयोदकादुदृत्य स्थापिता ।

अयं च चतुर्मुखब्रह्मणा सनकसनन्दनसनातनसनत्कुमाराः मनसा सृष्टाः। सृष्टिं प्रवर्धयितुं चाऽदिष्टाः। परन्तु ते तत्र विमुखा बभूवुः। ततश्च रुद्रदेवः सृष्टः क्रोधरूपेण तेन यथाब्रह्मापेक्षं सृष्टिः न प्रावर्तत।

ततश्च चतुर्मुखब्रह्मणः अंगेभ्यः मरीच्यत्र्यंगिरसः पुलस्त्यपुलहक्रतवः, भृगुवसिष्टदक्षाः, नारदश्च सृष्टाः। नारदवर्जं सर्वे सृष्टिं प्रवर्धयामासुः। ब्रह्मणो मनसः भ्रुव अधराश्च कामक्रोधलोभाः क्रमेणाऽविर्बभूवुः। तस्य छायया च कर्दमजन्माभूत् । अस्य चतुर्भ्यो मुखेभ्यश्चत्वारो वेदाः उपवेदाश्चाऽयुर्वेदादयः नानाक्रतवश्चोत्पनाः।

ब्रह्मचर्याद्याश्रमचतुष्टयं तत्प्रभेदांश्च व्यवस्थापयामास चतुर्मुखः। प्रणवः, व्याहृतयः, छन्दांसि, स्वराः व्यंजनानि चाऽविष्कृतानि। स्वशरीरे पुरुषभागं स्त्रीभागं च व्यवस्थाप्य पुरुषभागात् स्वायम्भुवं मनुं, स्त्रीभागात् शतरूपां च देवीं ससर्ज। एताभ्यां तथा मरीचिपुत्रात् कश्यपाच्च जगति जीवसंकुलं स्फीतमस्ति ।

पाद्मकल्पे भागशः प्रलीनस्य ज्योतिर्मण्डलस्य सृष्टिरपि श्वेतवराहकल्पे ब्रह्मणा कृता। जीवसंकुलं अतिमानं प्रवृद्दम्। चलनं दुष्करमासित् ।

**व्याप्ताऽभूदखिला भूमिः स्पन्दितं कोऽपि नाशकत्।**

(विष्णुरहस्ये)

ब्रह्मा च प्रजासंख्यापकर्षार्थं कांचन स्त्रियं ससर्ज। किंचिदेव

**व्याप्ताऽभूदखिला भूमिः स्पन्दितं कोऽपि नाशकत्।**

(विष्णुरहस्ये)

ब्रह्मा च प्रजासंख्यापकर्षार्थं कांचन स्त्रियं ससर्ज । किंचिदेव प्रजासंहारं कृत्वा दुष्करं च तत्कर्म चिन्तवन्ती सा रुरोद। तस्या अश्रुभ्यश्च ज्वरादयो रोगा आविर्बभूवुः। रोगाणां राजा राजयक्ष्मा च आविर्बभूव ।

**तदा प्रभृति ते रोगाः स्थावरे जंगमेऽपि च ।**

**व्याप्य तस्थुथो तत्कर्मपाकेन कालतः ।**

**उपचायकयोगेन घ्नन्ति वा पीडयन्त्यपि**

( विष्णुरहस्ये)

ततश्चामयप्रतीकाराणि द्रव्याणि आयुर्वेदश्च विसृज्य मरीच्यादीनामुपदिदेश ।

**उपचायकवत्तेषां परिहारार्थमप्यसौ ।**

**तत्तद्द्रव्यं विनिर्माय तज्ज्ञानार्थमुपादिशत् ।**

**आयुर्वेदमृषिभ्यश्च स मरीच्यादिभ्य एव च ॥**

(विष्णुरहस्ये)

अयं ब्रह्म धर्माधर्मयो अचारानाचारयोः व्यवस्थां स्वायम्भुवमनुमुदिश्य तद्द्वारा लोके प्रवर्तयामास। इदानीं वर्तमानः कल्पः श्वेतवराहकल्पः। भूर्भुवस्स्वर्लोकानां सृष्टिरत्रैव कल्पे संजाता । अत्र ये व्यवस्थाऽव्यस्थे ये च ज्ञानाज्ञाने अत्रैव जीवसंकुलं विना विरामं प्रापयति ।